Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
© 2023 GISRRJ | Volume 6 | Issue 6 | ISSN : 2582-0095

# कौमुदीस्थ पूर्वकृदन्तप्रकरेणे सुप्रसिद्धोदाहरणानां प्रक्रियाविमर्शः

इप्सिता राउत
शोधछात्रा ,व्याकरणविभगः, राष्ट्रिय संस्कृत विश्वविद्यालयः, तिरुपतिः

**Article Info**
Volume 6, Issue 6
**Page Number :** 209-211
**Publication Issue :**
November-December-2023
**Article History**
Accepted : 10 Dec 2023
Published : 30 Dec 2023

**साराशः –** महर्षि पाणिनिना शब्दसाधुत्वबोधनाय अष्टाध्यायी नामक ग्रन्थो उल्लेखिताः। तत्र ग्रन्थे षड्विधानि सबत्राणि प्रोक्तानि। उक्तञ्च – संज्ञा च परिभाषा च विधिनियमल एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ।। कारिकानुसारं षट्सु षट्विधसूत्रलक्षणेषु संज्ञा एवं विधिसूत्राणां महत् योगदानं वरिवर्तते । एवं विध विधिसूत्राणां पर्यालोचनं संपूर्णं कृदन्तप्रकरणे कृतं वर्तते । अत्रतत्र प्रत्ययविधायकसूत्रेषु नैकानि लोकप्रसिद्धान्युदाहरणानि तेषां प्रक्रिया अधः प्रस्तुयते ।

**मुख्यशब्दाः –** प्रकृतिः , प्रत्ययः , प्रक्रिया ,पूर्वकृदन्त , उदाहरणानि ।

**कारकः –** 'करोती' त्यर्थे कृधातोः **'ण्वुल्तृचौ**[1] इति ण्वुलि **'युवोरनाकौ**[2] इत्यका- देशे वृद्धौ विभक्तिकार्ये च कारकः इति सिद्धम् ।

**जनार्दनः**-'जनमर्दयती'ति विग्रहे 'अर्द हिसायाम्' इति धातोः णिचि **'नन्दिग्रहि**[3] इति ल्युप्रत्यये 'युवोरनाकौ इति योरनादेशे णिलोपे **'कर्तृकर्मणोःकृति'** [4] इति जनशब्दात् षष्ठीविभक्तिः षष्ठ्यन्तस्य कृता सह षष्ठीसमासे सुब्लुकि **एकदेशविकृतमनन्यवत्**'[5] इति प्रातिपदिकत्वात् सौ रुत्वे विसर्गे च जनार्दनः इति ।

**मधुसूदनः**- मधुं सूदयतीति मधुसूदनः । मधुमुपपद-'सूद् हिंसायां' धातोः कार्ये **'नन्दिग्रहि'** इत्यादिना ल्युप्रत्यये योरनादेशे मधुशब्दाद् कृद्योगे षष्ठी षष्ठ्यन्तस्य कृता सह समासे विभक्तिकार्ये च मधुसूदनः इति सिद्धम् ।

**विभीषणः –** विशेषेण भीषयते इति विग्रहे विपूर्वक भीष्धातोः णिचि ततो नन्दिग्रहि इत्यादिना ल्युप्रत्यये योरनादेशे षत्वे विभक्तिकार्ये च विभीषणः इति ।

[1]. पा.सू – 3-1-133
[2]. पा.सू -7-1-1
[3]. पा.सू -3-1-134
[4]. पा.सू-2-3-65
[5]. वार्तिकम्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**गोविन्दः –** गाः विन्दती'त्यर्थे गो अस् उपपद–'विद्लृ लाभे' धातोः **'गवादिषु विन्देः संज्ञायाम्'**[6] इति वार्तिकेन संज्ञागम्यमाने शप्रत्यये शित्त्वात् सार्वधातुकत्वे **'तुदादिभ्यः शः'**[7] इति शविकरणे **'शे- मुचादीनाम्'**[8] इति नुमि विभक्तिकार्ये च गोविन्दः इति सिद्धम् ।

**कुम्भकारः –** 'कुम्भं करोती'ति विग्रहे 'कुम्भ अस् कार' इत्यलौकिकविग्रहे **'तत्रोपपदं सप्तमीस्थम्'**[9] इति कुम्भशब्दस्योपपदसंज्ञायां कुम्भोपपदात् कृधातोः **'कर्मण्यण्'**[10] इत्यणि **'अचो ञ्णिति'**[11] इति वृद्धौ रपरत्वे 'कर्तृ'कर्मणोः कृति' इति कर्मणि षष्ठ्यां 'गतिकारके'ति परिभाषया सुबुत्पत्तेः प्रागेव **'उपपदमतिङ्'**[12] इति समासे सुब्लुकि एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकत्वेन सौ सस्य रुत्वे विसर्गे च कुम्भकारः इति ।

**कुरुचरः, कुरुचरी –** 'कुरौ चरति' इति विग्रहे कुरु ङि इत्युपपदे चरधातो **'चरेष्टः'**[13] इति टप्रत्यये सुलुकि विभक्तिकार्ये च कुरुचरः इति । स्त्रीत्वविवक्षायां टित्त्वात् ङीपि कुरुचरी इति ।

जनमेजयः – जनमेजयती'ति विग्रहे ण्यन्तादेज्धातोः **'एजेः खश्'**[14] इति खशि अनुबन्धलोपे शित्त्वात् सार्वधातुकसंज्ञायां शपि गुणे आयादेशे उपपदसमासे सुव्लुकि **'अरुद्विषजन्तस्य मुम्'**[15] इति मुमि विभक्तिकार्ये च जनमेजयः इति सिद्धम् ।

**प्रियंवद** - प्रियं वदती'ति विग्रहे प्रिय अमुपपदे वद्धातोः 'प्रियवशे वदः खच्' इति खचि 'कर्तृ' कर्मणोः कृति' इति कर्मषष्ठ्यां 'गतिकारके'ति सुबुत्पत्तेः प्रागेव उपपदसमासे सुब्लुकि **'अरुद्विषजदन्तस्य मुम्** इति मुमि मस्यानुस्वारे विभक्तिकार्ये च प्रियंवदः इति सिद्धम् ।

**ग्रामणीः –** 'ग्रामं नयती'ति विग्रहे ग्राममुपपदे नीधातोः 'सद्सूद्विषद्रुह इति क्विपि सर्वापहारे लोपे सुब्लकि **'अग्रग्रामाभ्यां नयतेर्णो वाच्यः'**[16] इति णत्वे हो विभक्तिकार्ये च ग्रामणीः इति।

**उष्णभोजी –** 'उष्णं भुङ्क्ते तच्छीलः' इति विग्रहे उष्णोपपदात् भुज्धातोः उप **'सुप्यजातो- णिनिस्ताच्छील्ये'**[17] इति णिनिप्रत्यये लघूपधगुणे कर्मणि षष्ठयामुप- पदसमासे कृदन्तत्वात् सौ दीर्घे सुलोपे नलोपे उष्णभोजी इति ।

---

6. वार्तिकम् –
7. पा.सू –3–1–77
8. पा.सू –7–1–59
9. पा.सू–3–1–92
10. पा.सू–3–2–1
11. पा.सू –7–2–115
12. पा.सू–2–2–19
13. पा.सू –3–2–16
14. पा.सू –3–2–18
15. पा.सू –6–3–67
16. वार्तिकम्
17. पा.सू – 3–2–78

**पण्डितम्मन्य:, पण्डितमानी –** 'पण्डितमात्मानं मन्यते' इति विग्रहे मन्धातो: इ **'आत्ममाने खश्च'**[18] इति खशि शित्त्वात् सार्वधातुकसंज्ञायां **'दिवादिभ्य: श्यन्'**[19] इति श्यनि कर्मणि षष्ठयामुपपदसमासे 'अरुद्विषदजन्तस्य मुम्' इति मुमि विभक्तिकार्ये च पण्डितम्मन्य: इति । पक्षे चकाराण्णिनि पण्डितमानी इति सिद्ध्यति ।

**सीमयाजी-** सोमेनेष्टवानि'ति विग्रहे सोम टा इति करणोपपदे यज्धातो: भूतार्थे **'करणे यज:**[20] इति णिनि अनुबन्धलोपे उपधावृद्धौ उपपदसमासे सुब्लुकि विभक्तिकार्ये च सोमयाजी इति सिद्धम् ।

**ब्रह्महा -** ब्रह्म हन्ती'ति विग्रहे ब्रह्म अमुपपदे हन्धातो: **'ब्रह्मभ्रूणवृत्रेषु क्विप्'**[21] इति भूतार्थे कर्मण्युपपदे क्विपि क्विप: सर्वापहारे समासे सुब्लुकि विभक्तिकार्ये च ब्रह्महा इति । **'क्विप् च**[22] इत्येव सिद्धे नियमार्थमिदं तत्र चतुर्विधो नियम: । ब्रह्म। दिष्वेव हन्तेरेव भूत एव क्विबेव । भाष्यमते द्विविधोऽयं नियमो ब्रह्मादिष्वेव क्विबेवेति दिक् ।

**प्रजा-** प्रोपसर्गात् जन्धातो: उपसर्गे च संज्ञायाम् इति ड प्रत्यये टिलोपे स्त्रीत्वे टापि विभक्तिकार्ये च प्रजा इति ।

**शुष्क: -** शुष् धातो: क्तप्रत्यये शुष: क: इति तकारस्य ककारे विभक्तिकार्ये च शुष्क: इति ।

**कष्टम् –** कष् धातो: क्तप्रत्यये कृच्छ्रगहनयो: कष: इति इण्निषेधे तकारस्य ष्टुत्वे विभक्तिकार्ये च कष्टम् इति ।

**हसितम् –** हस्धातोर्भावे नपुंसके भावे क्त: इति क्तप्रत्ययेऽनुबन्धलोपे इटि कृदन्तत्वात् सौ सोरमि अमि पूर्वरूपे च हसितम् इति ।

**यजमान: –** यज्धातोर्लटि तत्स्थाने पूङ्यजो: शानन् इति शाननि अनुबन्धलोपे शित्वात् सार्वधातुकत्वे शपि आने मुक् इति मुकि कृदन्तत्वात् सौ यजमान: इति ।

इत्येवं कौमुदीस्थपूर्वकृदन्तप्रकरेणे सुप्रसिद्धोदाहरणानां प्रक्रियाविमर्श: मया विहित: ।

## सन्दर्भग्रन्थसूची


1.लघुसिद्धान्तकोमुदी– आचार्य रघुनाथ शास्त्री–चौखम्बासुरभारतीप्रकाशन,वाराणासी।

2. लघुसिद्धान्तकोमुदी – आचार्य विश्वनाथ मिश्र: – चौखम्बा संस्कृत प्रतिष्ठा, दिल्ली।

3.वैयाकरणसिद्धान्तकौमुदी– श्रीगोपालदत्त पाण्डेय: – चौखम्बा सुरभारती प्रकाशन,

4. वैयाकरणसिद्धान्तकौमुदी– लक्ष्मी शर्मा – चौखम्बा सुरभारती प्रकाशन,वाराणासी।

5. परिभाषेन्दुशेखर: – आचार्य विश्वनाथ मिश्र – चौखम्बासुरभारतीप्रकाशन,वारणासी।

6.पाणिनीय अष्टाधायी पाठ:– स्वामी प्रह्लाद गिरि वेदान्तकेशरी – चौखम्बा सुरभारती प्रकाशन,वारणासी ।

7.कृत् प्रत्ययविश्लेषण – डा . गोपबन्धु मिश्र – संस्कृतप्रसारपरिषद् , आरा


[18]. पा.सू 3–2–83

[19]. पा.सू 3–1–69

[20]. पा.सू 3–2–85

[21]. पा.सू 3–2–87

[22]. पा.सू 3–2–76